## ।। अथ पंचविंशोऽध्याय : ।। Chapter-25

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ वाक्यतेर्विपुलं सर: ।।
यत्र दान्ताभिधानास्ति देवी विश्वार्तिहारिणी ।। १।।

पुरा दैत्यैर्महाराज सर्वयागादिका: क्रिया: ।।
भेजिरेऽब्दसहस्राणि जपध्यानादितत्परै: ।। २

गंगायमुनयोर्मध्यमाश्रित्य मुनिसेवितम् ।।
तप्यमाना महोदारैस्तपोभिर्दैत्यदानवा: ।।

बभूवुर्बलिन: सर्वे देवानां त्रासकारिण: ।। ३

तानवेक्ष्य तपोनिष्ठान् जपस्वाध्यायतत्परान्
वैराग्यं परमं प्राप्ता ऊचुर्वाचस्पतिं सुरा : ।। ४

देवा ऊचु :- त्वमस्माकं गुरू: श्रेष्ठो दीनानां परमा गति: ।।
तदादिश कथं कुर्मो दानवानां पराजयम्।। ५

यथा यथा तपस्यन्ते यजन्ते ब्रह्मचारिण : ।।
तथा तथा बलं स्फीतं लभन्ते दानवा द्विज ।। ६

-----

१ ई दानवै :
२ सी क देवा ऊचु र्बृहस्पतिम् ( ए ३) गुरू :
~~१ ए- मध्य~~

बृहस्पतिरुवाच :- त्रयीमार्गानुचरणादजेया दैत्यदानवाः ॥
यावत्त्रयीजुषस्तावत् पराजेया न दैवतैः ॥ ७

ततस्तपः करिष्यामि हितार्थं च सुरोत्तमाः ॥
त्रयीमार्गपरित्यागं करिष्यन्ति यथा द्विषः ॥ ८

बसिष्ठ उवाच :- इत्युक्त्वा त्रिदशान् भूप देवाचार्यो बृहस्पतिः ॥
श्रीमालं त्वरितो गत्वा तपः कर्तुं समुद्यतः ॥ ९

अथ सम्बत्सरस्यान्ते परितुष्टा सुरेश्वरी ॥
कृपया दर्शनं प्राप्ता देवाचार्यमवोचत् ॥ १०

देव्युवाच :- तुष्टास्मि तव देवर्षे परेण तपसामुना ॥
यत्ते मनोगतं किञ्चित्तदवेहि कृतं मया ॥ ११

बृहस्पतिरुवाच :- देवि स्वाचरिता दैत्यैः सर्वयागादिकाः क्रियाः ॥
तेन ते बलिनः सर्वे बाधन्ते त्रिदशालयान् ॥ १२

शरण्यं सर्वलोकानां सर्वापत्सु त्वमम्बिके ।।
ततो दमय देवेशि दानवान् धर्मचारिण: ।। १३

यथैते वैदिकं कर्म देवतानां[1] सुरद्विष: ।।
न कुर्वन्ति जगन्मातस्तथा कुरु प्रसीद मे ।। १४

देव्युवाच :- मोहयिष्याम्यहं दैत्यान् मा विषीद बृहस्पते ।।
असती बुद्धिमास्थाय विजयाय दिवौकसां ।। १५

हेतुवादार्थसंयुक्तं शास्त्रमाख्यापयन् भवान् ।।
वेदमार्गपरिभ्रष्टान् सुखं दैत्यान् करिष्यति ।। १६

असाधुमतिरूपेण दमयिष्ये दुरात्मन: ।।
मिथ्याकल्पित धर्माणामुपदेष्टास्तु वै भवान् ।। १७

विद्युयवन्छविद्वत०धव

वसिष्ठ उवाच :- तथेत्युक्त्वा सुराचार्यो देवी राजन् जगद्धितां[2] ।।
प्रीतस्तत्र जगामाशु यत्र[3] तेजस्विनोऽसुरा: १८

---

१ बी ई स्मार्तं चैव सुरद्विष, ३ बी ई- यत्र ते यज्ञिनो सुरा:
(ए१) जगाद्धितां

निर्माय मायया शिष्यान् वाग्मिनो हेतुवादिनः ।।
विधाय मुण्डिनो रूपं गंगातीरेऽभ्यवातरत् ।। १६

गंगातीरनिविष्टानां हेतुशास्त्रार्थवादिनाम् ।।
देवाचार्यस्य शिष्याणां देवतार्थमुपेयुषाम् ।। २०

सहायार्थं तदा देवी मोहार्थं चामरद्विषाम् ।।
असाधुबुद्धिरूपेण हृदि तेषां व्यवस्थिता ।। २१

अथ तेनोग्ररूपेण बार्हस्पत्या नरेश्वर ।
सत्कर्मप्ररतान् दैत्यानिदमाहुरतन्द्रिताः ।। २२

बार्हस्पत्या ऊचुः- किमर्थं क्रियते दैत्याः कर्मलोकविगर्हितम् ।।
पशवोऽर्थैर्नहन्यन्तेभिवद्भिः करुणातिगैः ।। २३

आक्रोशतः कम्पमानान् बहून् हत्वा पशून्मखे ।।
भविता यदि वः स्वर्गः सुकृतेन नरको भवेत् ।। २४

-----

१ बी तीर ई गंगा तारे (ए २) शिस्याणां
३ ई सी क सादेवी बुद्धिरूपेण (ए ५) करुणीतिगै
वी ४ अथ ते नग्नरूपेण

सर्वदैवमयो जीव इत्याहुर्ब्राह्मणा अपि ।।
तद्वधाद्यदि तुष्यन्ति केन न तुष्यन्ति तत्सुराः ।। २५

यदि सर्वेश्वरा देवास्त्रैलोक्यत्राणकारिण : ।।
पशूनामीशते किन्तु मोदन्ते तद्वधेन यत् ।। २६

सन्ति द्रव्याण्यनेकानि देवानां बलवृद्धये ।।
भवद्भिस्तु कथं मौढ्याद्धन्यन्ते पशवो सुराः ।। २७

श्रद्धा श्राद्धेषु या चेयं दग्धानपि पितृन् प्रति ।।
कर्मणान्यत्र यातानां तेषां श्राद्धफलं कुत: ।। २८

ततो वेदान् परित्यज्य पशूनां हिंसनं तथा ।।
सत्य प्राप्स्यथ दैतेया वीतरागं परं पदं ।। २९

वसिष्ठ उवाच :- इति हैतु-विवादांस्तान् श्रुत्वा तेषां सुरद्विष : ।।
हृदि विभ्रामिता देव्या त्यक्तवन्तस्त्रयीं क्षणात् ।। ३०

---

१ बी ई कुप्यन्ति ते सुरा : , ई कुप्यन्ति
२ बी ई किंतन्
३ बी मोहाद् बध्यन्ते ३ स्तकंथमोठाद्धिध्यंते
४ सी क डी १ त्रप्रयातानाम् ५ बी ई हेतु विदांस्तांस्तान्

---

मुमुचुर्धर्मशास्त्रोक्तं व्यवहारं च वेश्मसु ।।
छन्दांसि नाधिगच्छन्ति न श्राद्धेष्वपि चादरः ।। ३१

तेन तेषां बलं क्षीणं त्रयीत्यागान्नरेश्वर ।।
निजघ्नुस्तानथो देवा बलिनो दुर्बलान् रणे ।। ३२

हन्यमानाश्च ते देवैः केचित्पातालमाविशन् ।।
केचिल्लुञ्चितमूर्द्धानो भेद भिन्ना व्यवस्थिताः ।। ३३

दयाधर्मं प्रब्रुवाणाः केचित् काषायवाससः ३४

इति देवा निहत्याजौ दैतेयान् युधि पार्थिव ।।
बध्दाञ्जलिपुटाः सर्वे प्रोचुरांगिरसं मुनिम् ।। ३५

देवा ऊचुः
हेतुवादेन देवारीन् भ्रंशयित्वा त्रयीपथात् ।।
परित्राताः सुराः सर्वे देवाचार्य नमोऽस्तु ते ।। ३६

तेन ते परितोषार्थं देवाचार्य दिवौकस : ।।
यच्छन्ति वाँछितं ब्रूहि यत्ते मनसि वर्त्तते ।। ३७

बृहस्पति उवाच :- यत्र मे सुरकार्यार्थं श्रीमाले विहितं तपः ।।
तीर्थं तदस्तु मन्नाम्ना लोके ख्यातं सुरोत्तमाः ।। ३८

देवा ऊचु :- यत्र त्वया तपस्तप्तं देवख्याते बृहस्पते ।।
तद्वाक्पतिसरो नाम लोके ख्यातं भविष्यति ।। ३९

वसिष्ठ उवाच :- इत्युक्तवत्सु देवेषु देवी दानवमोहिनी ।।
व्यक्तमूर्तिधरा राजन् प्रत्यक्षा समदृश्यत ।। ४०

तां प्रणम्याथ देवेशां देवा भक्तिपुरःसराः ।।
गुरुणा समनुज्ञाताः सेन्द्रा देव्यै वरं ददुः ।। ४१

देवा ऊचु :- बुद्धिमास्थाय दैत्यानां त्वया वै दमनं कृतम् ।।
तस्माद्दान्तेति ते नाम लोके ख्यातिं गमिष्यति ।। ४२

बृहस्पतिसरस्तीरे भवतीं समवस्थिताम् ।।
पूजयिष्यन्ति ये मर्त्या न ते यास्यन्ति दुर्गतिम् ।। ४३

वसिष्ठ उवाच :- इत्युक्त्वा ते ततो देवास्त्रिदिवं मुदिता ययु: ।।

~~मन्त्रविशारदं:-~~ बृहस्पतिं पुरस्कृत्य गुरुं मन्त्र[1] विशारदम् । ४४

ततः प्रभृति सा देवी बृहस्पतिसरस्तटे ।।
दैत्यानां दमनाद्दान्ता विश्रुताभून्महीतले ।। ४५

यस्तत्र कुरुते स्नानं सिताष्टम्यां समाहित:[2] ।।
दान्तामर्च्चयते देवीं स भवे-द्वाग्विदां वर: ।। ४६

तत्र दानं प्रशंसन्ति विप्रा वेदांगपारगा: ।।
धर्मशास्त्रार्थपूर्णानां[3] पुस्तकानां विशांपते ।। ४७

एतत्ते कथितं राजन् देवी दान्ता यथा भुवि ।।
यथा च वाक्पतिसर: श्रीमाले सम्बभूवतु: ।। ४८

---

इति श्री स्कंदपुराणे एकाशीति साहस्त्रयां संहितायां ब्राह्म्य विभागे तृतीयपरिच्छेदे श्रीमाल माहात्म्ये वाक्पतिसर-माहात्म्यं नाम पञ्चविंशोऽध्याय: ।।

१ ए मन्त्री
२ ए चामाहित :
३ ए पूर्णा